National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2026; 1(64): 73-76
© 2026 NJHSR
www.sanskritarticle.com

**फूलचन्दः**
शोधछात्रः, साहित्य विभागः,
राष्ट्रिय संस्कृतविश्विद्यालयः,
तिरुपतिः

**Correspondence:**
**फूलचन्दः**
शोधछात्रः, साहित्य विभागः,
राष्ट्रिय संस्कृतविश्विद्यालयः,
तिरुपतिः

# रत्नपालचरितस्य परिचयः

**फूलचन्दः**

इदं 'रत्नपालचरितमिति काव्यं आचार्यमहाप्रज्ञेन विरचितं खण्डकाव्यमस्ति । अस्मिन् खण्डकाव्ये 226 श्लोकाः सन्ति, ये पञ्चसर्गेषु विभक्ताः सन्ति । ग्रन्थेऽस्मिन् राजारत्नपालस्य काल्पनिककथा वर्णिता वर्तते । राज्ञः रत्नपालस्य चरितवर्णनमस्ति इति कारणतः अस्य ग्रन्थस्य नाम रत्नपालचरितम् इति । आधुनिककाले अनेके सारस्वतपुरुषाः स्वप्रतिभाद्वारा संस्कृतभारतीं सुसमृद्धा कुर्वन्तः सन्ति। आचार्य-महाप्रज्ञमहोदयाः आधुनिकजगतः सुप्रसिद्धदार्शनिकाः, विचारकाः एवं नवनवोन्मेषप्रतिभाशाली-महाकवयः सन्ति । तेषां संस्कृतभाषायाः हिन्दीभाषायाः राजस्थानीभाषायाश्च काव्यग्रन्थाः प्रसिद्धाः सन्ति । संस्कृतभाषायां संबोधि, अश्रुवीणा, भिक्षुगाथा, मुकुलम् इत्यादयः विशिष्टग्रन्थाः सन्ति। 'ऋषभायण' हिन्दीभाषायाः उत्कृष्टं महाकाव्यं वर्तते ।

मङ्गलाचरणेन खण्डकाव्यस्यास्य आरम्भः भवति। इदं खण्डकाव्यं चरित्रचित्रणदृष्ट्या उत्तमं काव्यम् अस्ति। अस्मिन् ग्रन्थे शान्तरसस्य प्राधान्यं वर्तते। सूक्तीनां प्रयोगः बहुत्र दृश्यते। महाकविना काव्येऽस्मिन् राजा रत्नपालः, कुमारी रत्नवती, मंत्री, वनस्पतयः, वृक्षाः, सरोवरादीनां पात्राणां महत् चित्रणं कृतम् वर्तते । राज्ञा सह वृक्षसरोवरादीनां मानववत् सम्भाषणं कवेः प्रतिभायाः विशालहृदयस्य च उत्तममुदाहरणम् अस्ति।

भारतीयकाव्यपरम्परायां प्रकृतेः महत्वपूर्णं स्थानं वर्तते। प्रायः सर्वेऽपि आचार्याः प्रकृतेः महत्वं स्वीकुर्वन्ति। प्रकृति मानवानां कृते सहायिका अस्ति। एतत् बोधयितुं कविना राज्ञा सह वृक्षपुष्पलतासरोवरादीनां मानववत् सम्भाषणस्य वर्णनम् उत्तमरूपेण कृतम्। ग्रन्थेऽस्मिन् राजारत्नपालः यदा देशाटनं कर्तुं गच्छति तदा सः वृक्षेण सह सम्भाषणं करोति । महाकविना वृक्षस्य मनोभावम् उत्तमरूपेण वर्णितं । वृक्षः शब्दायते यत् -

**छिन्दन्ति भिन्दन्ति जनास्तथापि पूत्कूर्महे नो तव सन्निधाने ।**
**क्षमातनूजा इति संप्रधार्य क्षमां वहामो न रुषं सृजामः ।।**[1]

अर्थात् हे राजन् ! जनाः अस्मान् भेदयन्ति, तथापि वयं भवन्तं प्रति असन्तोषं न प्रकटयामः। वयं क्षमायाः (पृथिव्याः) पुत्राः स्मः- एवं चिन्तयन्तः वयं क्षमाम् आलिङ्गयामः, कदापि क्रुद्धाः न भवेम। अनेन प्रकारेण कविः वृक्षस्य मनोभावं बोधयति। येन जनाः वृक्षेभ्यः क्षमाशीलतायाः शिक्षां ग्रहीतुं शक्नुवन्ति ।

अन्यदेकम् उदाहरणं यथा राजा रात्रिम् वदति - त्वं पापमाता, किमर्थम् आगच्छसि, केवलं तव आश्रये पापानि भवन्ति । लोकमूलत्वेन प्रसिद्धा रात्रिः अस्मिन् आचार्यमहाप्रज्ञप्रणीतकाव्ये न केवलं हास्येन प्रत्युत्तरं ददाति, अपितु अभिमानी-भ्रमित-राज्ञे श्रेयस्-धर्मस्य मार्गमपि दर्शयति।

रात्रिः राजानं शब्दायते यत्-

**परमहो ! मनुजा अविवेकिनो,**
**नहि भवन्ति रहस्यविदः क्वचित्।**

**अपचिकीर्षव एव तमो मम,**

**गृहमणेर्निचयान्मनसो न च।।**[2] (रत्न. 3.9)

अर्थात् हे राजन्! महान् आश्चर्यम्। मनुष्याः कियत् अनिर्णयात्मकाः सन्ति? ते रहस्यमेव न जानन्ति। जनाः दीपस्य साहाय्येन मम अन्धकारं दूरीकर्तुं इच्छन्ति, परन्तु मनसि गहनं अन्धकारं दूरीकर्तुं न इच्छन्ति ।

प्रकृतेः मानववत् वर्णनं अस्य काव्यस्य विशेषता अस्ति । एतत्काव्यं रसानां, अलंकाराणां, छन्दसां, सूक्तीनां, वाक्य-वैचित्र्यस्य च दृष्ट्या उत्कृष्टं खण्डकाव्यम् अस्ति।

चरित्रगुणशीलनिरूपकचरितकाव्यलक्षणलक्षिते पंचसर्गात्मकेऽस्मिन् खण्डकाव्ये रत्नपालरत्नवत्योश्च कथा जैनकथास्थापत्यसरणिमाश्रित्य आचार्यमहाप्रज्ञेन निगदिता। काव्यकलायाः कोमलकल्पनायाः भावसौन्दर्यस्य च दृष्टया श्रेष्ठकाव्यग्रन्थेऽस्मिन् महाकवेर्महाप्रज्ञस्य जीवनदर्शनस्योपस्थापनं स्पष्टरूपेण परिलक्षितमस्ति । अस्य ग्रन्थस्य वैशिष्ट्यमुपरि वर्णितं वर्तते एव ।

'रत्नपालचरितम्' इति काव्ये दाक्षिणात्यदेशस्य सुसमृद्धशक्रपुरस्य राजा रत्नपालस्य चरितं वर्णितं वर्तते । रत्नपालस्य पिता चन्द्रकीर्तिः एवं माता चन्द्रकान्ता अस्ति। रत्नपालस्य जन्मनः पूर्वरात्रौ राज्ञि चन्द्राकान्ता स्वप्ने रत्नराशिं दृष्टवती। अतः तस्याः पुत्रस्य श्रीरत्नपालः इति नाम स्थापितवन्तः। राज्ञः रत्नपालस्य चरितवर्णनं पञ्च-सर्गेषु (२२६ श्लोकाः) विभक्तम् अस्ति। काव्यस्य आरम्भे मङ्गलाचरणं चतुर्षु श्लोकेषु निबद्धं वर्तते ।

**मंगलाचरणम्**

'मं (मलं) पापं गालयति विध्वंसयतीति मंगलम्' अर्थात् -यः पापनाशकः तत् मङ्गलम् इति। 'मंगं सुखं पुण्यं तल्लाति आदत्ते गृह्णाति वा मङ्गलम्' अर्थात् यः सुखदायकः तत् मङ्गलम् इति। तात्पर्यमस्ति यत् मंगलाचरणेन पापविनाशः सुखप्राप्तिश्च भवति इति। अत एव ग्रन्थस्यारम्भे मंगलाचरणस्य विधानं क्रियते। आचार्य-पतञ्जलिः महाभाष्ये लिखितवान् अस्ति-

मंगलादीनि शास्त्राणि प्रथन्ते वीरपुरुषाणि भवन्त्यायुष्मत्पुरुषाणि चाध्येतारश्च वृद्धियुक्ता यथा स्युः अर्थात्- येषां शास्त्राणां प्रारम्भः मंगलाचरणेन भवति, तानि शास्त्राणि प्रसिद्धानि भवन्ति। ये तानि शास्त्राणि अधीते ते वीराः, दीर्घायुः भवन्ति एवञ्च तानि अधीतानां छात्राणां सर्वाः इच्छाः सिद्धाः भवन्ति इति। महाकविः महाप्रज्ञः एतस्याः परम्परायाः निर्वाहार्थं महत् कार्यं कृतवान् अस्ति। काव्यारम्भे चतुर्षु श्लोकेषु उत्कृष्टस्य मंगलाचरणस्य प्रतिपादनं कृतं वर्तते ।

प्रथमे श्लोके भगवान् महावीरः,

**श्री केवलज्ञान विभाकरेण, विभूषितज्ञातसुतस्य शस्या।**

**सरस्वती कल्पलतेव काम्या, स्वारोहतात् मानसहंसपोतम् ।। 1 ।।**

द्वितीये श्लोके स्वामी भिक्षु (तेरापंथप्रवर्तकः आद्याचार्यः),

**तत्वं दिदृक्षोर्मुनिपस्य भिक्षो, रात्मानुभूति र्विमला समन्तात् ।**

**काव्येऽपि नव्यं निगमं निनाय, सा कल्पनायै धृतमूर्तिरस्तु ।। 2 ।।**

तृतीये श्लोके महामहिम कालुगणि (आचार्य महाप्रज्ञस्य दीक्षागुरुः)

**कालोः कृपालोः करुणालवोपि, जवाददाद् मे नवजीवनानि ।**

**वात्सल्यमूर्त्तेः स्मृति मात्रतोऽपि, दृष्टानि चक्षूंसि गलन्ति पुंसाम् ॥3॥**

तथा चतुर्थे श्लोके गणाधिपति आचार्यश्री तुलसीरामस्य स्तुतिः कृतं वर्तते ।

**रामोतरो यो भजतेऽपि राम, लसन् स्वदीस्या तुलसीगणेशः ।**

**स सर्वदानन्दविधायिवाण्या, सुधारसं सिञ्चतु मे सरण्याम् ।। 4 ।।**

मंगलाचरणस्य त्रयः प्रकाराः सन्ति-

1. आशीर्वादात्मकं, 2. नमस्कारात्मकं, 3. वस्तुनिर्देशात्मकं च ।

प्रस्तुतग्रंथस्य मंगलाचरणस्य चत्वारः अपि श्लोकाः आशीर्वादात्मकाः सन्ति, स्तुत्यात्मकाः अपि सन्ति । चतुर्षु अपि श्लोकेषु कविना स्वीयगुरुवर्याणां आशीर्वादप्राप्तेः कामना कृता अस्ति-

1. सरस्वती कल्पलतेव काम्या, स्वारोहतात् मानसहंसपोतम्।
2. सा कल्पनायै धृतमूर्तिरस्तु ।
3. दृष्टानि चक्षूंसि गलंति पुंसाम्।
4. सुधारसं सिंचतु मे सरण्याम् ।

**प्रथमसर्गः**

सर्गेऽस्मिन् एकचत्वारिंशत् श्लोकाः सन्ति। अस्मिन् सर्गे राज्ञः रत्नपालस्य देशाटनस्य वर्णनम् अस्ति। प्रथमसर्गः**'सन्तो निसर्गात् उपकारिणो यत्'**[3] इति सूक्त्यनुसारं सन्तस्वभाववर्णनेन आरभ्यते । तत्रैव सूर्योदयस्य मनोहरवर्णनं दृश्यते । प्रथमसर्गस्य प्रथमदशश्लोकेषु सभासदस्यैः राज्ञः सूर्यस्य च तुलना कृता एवं प्रदेशाटनस्य लाभाः च बोधिताः ।

सदस्याः वदन्ति - उलूकस्य अप्रसन्नतायाः कारणं ज्ञातुं (1.7), पङ्कजे स्थितभ्रमराणां मुक्त्यर्थं (१.८) अन्धकारस्य विनाशार्थं (१.९) यात्रां विना यशः नास्ति (१.१०) अत एव सूर्यः परिभ्रमति ।

अन्तिमसदस्यस्य तर्केण प्रभावितः राजा 'देशाटनं विना ख्यातिर्न स्यात्' इत्युक्त्वा देशाटनं प्रति प्रस्थितवान् । वनभ्रमणेन सः बहुप्रसन्नः

भवति । प्राकृतिकं जगत् एव तस्य सहचरः अभवत् । यथा रघुवंश-महाकाव्ये यदा दिलीपः गो-सेवायै प्रस्थायति तदा सर्वे वनवृक्षाः राज्ञः स्वागतं कुर्वन्ति । तत्र वृक्षपशुपक्षिणां सुन्दरं वर्णनं दृश्यते ।

सहसा तत्र स्वर्गात् अदृश्या कन्या कण्ठे मालां स्थापयित्वा तं स्तुवति। राजा आश्चर्यचकितः भवति। तदनन्तरं राजा वृक्षैः तडगादिप्रकृतिक-प्राणिभिः सह संभाषणं करोति। कविः स्वगुरुवर्यस्य स्मरणं, सरोवरस्य सन्तुष्टिः एवं 'देवसहायाः कृतीनां भवन्ति (देवाः अपि सौभाग्यशालिनः सहायकाः भवन्ति) इति सूक्त्यनन्तरं सर्गस्यास्य समाप्तिः भवति ।

**देवाः सहायाः कृतिनां भवन्ति,**
**परोक्षमित्यस्ति वचोजनानाम्**
**देवसहायस्तुलसीमुनीशः,**
**प्रत्यक्षमेवानुभवामि शश्वत् ।। 41 ।।** [4]

**द्वितीयसर्गः**

सर्गेऽस्मिन् नवपञ्चाशत् श्लोकाः सन्ति। सरसि स्नानप्रसङ्गेन द्वितीयः सर्गः आरभ्यते । सर्वादौ स्वामीभक्तेः सुन्दरमुदाहरणं दत्तं वर्तते । यथा-

**भृत्यः सृजन् स्वामिसुखाय यत्न**
**मतर्कितं याति पदं वरिष्टम् ।**
**इतीव सोऽस्नापयदूर्ध्व पाति,**
**स्वच्छाम्बुना भुधवमुच्चभक्तिः ।।**[5]

यदा राजा सरसि स्नात्वा निर्गच्छति तदा एकस्याः कन्यायाः स्वरः श्रूयते, या पूर्वं राज्ञः कण्ठे मालां स्थापितवती आसीत्, तस्याः कन्यायाः सखी आसीत् । यदा राजा तस्याः प्रेमकारणं पृच्छति । तदैव मालां स्थापितवती कन्या हसन्ती आगत्य स्वीय परिचयं ददाति । परिचयस्य क्रमे सा कथयति यत् मम मातुलः निर्दयतापूर्वकं मम राज्यं अपहृत्य मम पितरं गृहीत्वा वधकेभ्यः वधस्य आदेशं दत्तवान्, परन्तु वधकाः मम पितरं दयापूर्वकं त्यक्तवन्तः। पिता निर्गत्य एवम् पलायितवान् यथा कर्मरहितात्मा परलोकं गच्छति। मम पितुः कृते कठिनः समयः आसीत्। पश्चात् विश्वस्तपात्राणां साहाय्येन मम माता बहुधनेन सह पितरं प्राप्नोति, यथा ज्योत्स्ना शान्तिसहितं चन्द्रं प्राप्नोति। सा युवतिः अग्रे रत्नपालं वदति - अहं ज्योतिर्विद्भ्यः श्रुतवती यत् त्वं मम भाविस्वामी भविष्यसि, अतः पूर्वं त्वं मम सखीं विद्युत् इव दृष्टवान् एवञ्च अधुना अहं मेघमाला इव साक्षात् उपस्थिता अस्मि। कविना उक्तञ्च -

**ज्योतिर्विदा त्वं मम भाग्यभूभृः,**
**न्निवेदितस्तेन ममात्मभूता**
**सखी त्वयालोकि शतह देवाऽ,**
**हं मेघमालेव विलोकनीया ।।**[6]

राजा रत्नपालः आत्मज्ञानबलेन युवत्याः पितुः राज्यं विजित्य तस्मै पुनः समर्पयति। तदनन्तरं जातिस्मृतिज्ञानं प्राप्नोति। श्रीपत्तनराजेन तस्य वृत्तान्तपृष्टे सति सः एकस्य दरिद्रस्य ब्राह्मणस्य कथां कथयति, यः वसंतपुरस्य निवासी आसीत् । मुनिदत्तमहामन्त्रस्य जपप्रभावात् मम (रत्नपालस्य) रूपेण दरिद्रस्य ब्राह्मणस्य जन्मम् अभवत् ।

**तृतीयसर्गः**

सर्गेऽस्मिन् सप्तत्रिंशत् श्लोकाः सन्ति । तृतीयसर्गः राज्ञः रात्रौ च संवादेन आरभ्यते। राजा कथयति यत् रात्रौ अन्धकारस्य कारणतः लोके भयं पापं च वर्धते इति । उक्तञ्च-

**अयि निशे! तनुषे तिमिराकुलं,**
**जगदिदं विदितं नहि किं तव ।**
**भयमुपाददते मनुजा अतो,**
**भवति कातरता विततातताः।।**[7]

तस्य कथनस्य प्रत्युत्तररूपेण रात्रिः स्वस्य शुद्धरूपस्य विषये कथयति। अहं परोपकारार्थमेव नियतसमये आगच्छामि गच्छामि च। जनाः दीपं प्रज्वाल्य मम अन्धकारं दूरीकर्तुं इच्छन्ति, परन्तु ते किमर्थं मनसः अन्धकारं न दूरीकुर्वन्ति? उक्तञ्च -

**परमहो! मनुजा अविवेकिनो,नहि भवन्ति रहस्यविदः क्वचित्।**
**अपचिकीर्षव एव तमो मम, गृहमणेर्निचयान्मनसो न च।।**[8]

तदनन्तरं रात्रिवचनेन प्रसन्नः सन् राजा अनिश्चितमार्गेण अग्रे गच्छति ।

सूर्योदयसमये राजकुमारी स्वीयप्रियं राजानं समीपे न प्राप्नोति तस्मिन् समये नृरसुता (राजकुमारी) तमन्वेष्टुं प्रस्थानं करोति। मधुकराक्षरन्यायेन (अनायासेन मेलनं) मन्त्रिणः एवं विरहिणी-कुमार्याः मेलनं भवति । तदनन्तरं राजकुमार्याः निर्देशं प्राप्य मन्त्री रत्नपालस्य जीवनवृत्तान्तं कथयति - रत्नपालः दक्षिणभारते समृद्धस्य शक्रपुरस्य राजा चन्द्रकीर्तेः पुत्रः अस्ति । तस्य मातुः नाम चन्द्रकान्ता। राज्ञ्याः चन्द्रकान्तायाः यदा पुत्रमभवत् तदा राज्ञ्या स्वप्ने एव रत्नराशिं दृष्टवती। अतः तस्याः पुत्रस्य नाम श्रीरत्नपालः इति स्थापितवन्तः। उक्तञ्च-

**तस्याः सुतश्चारुरुचिर्बभूव,**
**स्वप्नेऽपि संसूचितरत्नराशिः ।**
**श्री रत्नपालेति ततः स्वसूनो-**
**र्नामाऽर्पयामास वसुन्धरेन्द्रः ।।**[9]

कुमाररत्नपालस्य विवाहः कोशलराजस्य पुत्री सुकोशया सह अभवत्। गृहसंस्कारस्य च अनन्तरं रत्नपालस्य पिता स्वश्वेतकेशं दृष्ट्वा स्वपुत्रं राज्ये अधिरोपिणं कृत्वा स्वपत्न्या सह जैनीदीक्षाम् अङ्गीचकार।

वसुमती (पृथिवी) रत्नपालसदृशं प्रजावत्सलं राजानं प्राप्य प्रसन्ना भवति। तदनन्तरेषु सप्तसु श्लोकेषु राज्ञः पृथिव्याः च संवादः अस्ति, यस्मिन् पृथिव्याः माहात्म्यम्, श्रेष्ठस्य नृपस्य गुणाः च वर्णिताः। तदनन्तरं मन्त्री स्वेच्छां प्रकटयति यत् अहं राजानं पुनः आनेतुं उत्सुकः अस्मि यथा पद्मतेजसा सूर्यं प्रति आनयितुं उत्साहः भवति। एषः सर्गः गुरुदेवस्य तुलसीरामस्य वर्णनेन समाप्यते।

**चतुर्थसर्गः**

चतुर्थे सर्गे सप्तत्रिंशत् श्लोकाः सन्ति। मन्त्रीतः वृत्तान्तं श्रुत्वा राजकुमारी राजानं अन्वेष्टुं वने व्रजति। सा स्वयं अरण्यं राज्ञः रत्नपालस्य विषये पृच्छति। पुनः वने प्रत्येकस्मात् वृक्षात् स्वप्रियतमस्य अन्वेषणे साहाय्यं याचते। अस्मिन् प्रकरणे विरहस्य विविधाः परिस्थितयः वर्णिताः सन्ति। सा अशोकवृक्षं पृच्छति – हे अशोक ! (वृक्षविशेषः) प्रियविरहकारणतः शोकयुक्तां मां किमर्थं अशोकां (शोकरहितां) न कुरुषे ? उक्तञ्च -

**नाऽशोकां कुरुषे किमशोक,**
**मां च सशोकां प्रियविरहेण।**
**लज्जास्पदमपि भविता सद्यो,**
**नाम तवेदं गुणशून्यत्वात्॥**[10]

अत्र रात्र्याः वर्णनं, भूमौ शयनं, स्वप्नदर्शनं, निद्रातः जागरणं इत्यादयाः विरहावस्थाः वर्णिताः सन्ति। राजकुमारी स्वीयभ्रमं अवगच्छति। जगतः विरसतां, मोहरूपतां च दृष्ट्वा तस्य मनः विरक्तः भवति। मार्गे एकः भिक्षुः लभ्यते, यः मन्त्रीणा सेवितः आसीत्। मुनिः धार्मिकोपदेशं ददाति, आत्मकथां च श्रावयति। एवञ्च सर्गान्ते गुरुदेवतुलसीरामस्य महिमा वर्णिता अस्ति यथा

**यत्र प्रदीपकलिका कुरुते प्रकाशं,**
**विद्युतद्युतिः स्फुरति दीव्यति सप्तसप्तिः।**
**नावश्यको भवति तत्र तव प्रकाशः,**
**साधारणोष्विव महांस्तुलसीमुनीशः॥**[11]

**पञ्चमसर्गः**

पञ्चमसर्गे अष्टचत्वारिंशत् श्लोकाः सन्ति। सर्गोऽयं मुनिमन्त्रिसंवादेन आरभ्यते। अत्र राजनीतेः अनेके गुप्तरहस्यानां निरुपणमस्ति। मन्त्रिः अपि दीक्षां प्राप्तुम् इच्छति। मुनिः (यः रत्नपालः एव आसीत्) प्रभावात् राज्यस्य समृद्धिः वर्णयति। रत्नवती अपि साध्वी अभवत्। श्वः यावत् विरहकारणात् प्रकृतेः प्रत्येकं कणेषु रत्नपालं पश्यन्ती कुमारी अद्य सर्वत्र अपारं शान्तरसाम्बुधिम् अवलोकयति। सा सृष्टेः प्रत्येकस्मिन् विषये शान्तमयी इव द्रष्टुं आरब्धवती अस्ति। उक्तञ्च –

**स्वीकृत्य दीक्षां महिपर्षि पार्श्वे,**
**साध्वी समेता मुनिता धनाढ्या।**
**तेनाऽध्वनासौ विजहार येन,**
**पतिं पुरान्वेष्टुमथो जगाम॥**[12]

सा व्योमः, पन्थानः, कणाः, नद्यः, वृक्षाः, लताः, कोकिला, पवनादिभिः सह सम्भाषणं करोति। सम्पूर्णप्रकृतेः आलोचनां कृत्वा साध्वी रत्नवती मोक्षमार्गे अतीव आसक्तः भवति। मन्त्री अपि राज्यप्रशासनस्य सम्यक् व्यवस्थां कृत्वा संयममार्गे आसक्तः भवति। उक्तञ्च -

**इत्यालोचनतत्परामुनिपदे रक्ताबभूवाधिकं,**
**स्वात्मानं विशदीकरोति सततं राजर्षिरप्यात्मना।**
**मंत्री तंत्रविधिं विधाय विधिवज्जग्राह दीक्षां शुभां,**
**सन्तो यान्तियथेप्सितं सुविदितामात्मानुभूतिं पराम्॥**[13]

अत्रैव ग्रन्थस्यास्य समाप्तिः भवति।

**सन्दर्भग्रन्थसूची:-**

**रत्नपालचरितम्**। आचार्य महाप्रज्ञः। जैन विश्व भारती संस्थान लाडनू राजस्थान।

**महाभाष्यम्।** पतंजली। व्याख्या. जयशंकरलाल त्रिपाठी। चौखम्बा कृष्णदास अकादमी वाराणसी संस्करणम् तृतीयम् -2007

**सन्दर्भाः**

[1] रत्नपालचरितम् 1.33
[2] रत्नपालचरितम् 3.9
[3] महाभाष्य - प्रथमाह्निक, पृष्ठ.38
[4] रत्नपालचरितम् 1.1
[5] रत्नपालचरितम् 2.1
[6] रत्नपालचरितम् 2.2
[7] रत्नपालचरितम् 2.27
[8] रत्नपालचरितम् 3.9
[9] रत्नपालचरितम् 3.21
[10] रत्नपालचरितम् 4.4
[11] रत्नपालचरितम् 4.37
[12] रत्नपालचरितम् 5.25
[13] रत्नपालचरितम् 5.48